# शिक्षाशास्त्री (बी.एड्.)

## अष्टात्रिंशत्तमः आदेशः

## (विद्वत्परिषद्व्यवस्थापनपरिषद्भ्यां यथासंशोधितम्)

निर्देशयिष्यमाणप्रयोजनानुषक्तशिक्षाशास्त्रिनामकाभ्यासक्रमपदवीसंप्राप्त्यर्थपरीक्षाध्यादेशसंशोधनस्योपपन्नत्वात् अनुवर्तमानाध्यादेशसंशोधनार्थमियं व्यवस्थापनपरिषदितःप्रसीदति –

१. शिक्षणस्नातक(शिक्षाशास्त्री)पदव्यर्थपरीक्षाणामयं संशोधिताध्यादेशाभिधोऽयमध्यादेशो भवतु। व्यवस्थापनपरिषन्निर्णीत्यनुसारमयमस्मात् २००५-०६ शैक्षणिकवर्षादध्यादेशः प्रवर्तिष्यते।

२. विश्वविद्यालयनिर्णीत्यनुसारमितस्ततत्तत्प्रदेशेषु तत्तद्दिनाङ्केषु चास्याः शिक्षणस्नातक(शिक्षाशास्त्री) पदव्याः परीक्षाः प्रतिहायनं भविष्यन्ति।

३. परीक्षार्थी बुभूषुरेवंविधयोग्यतासम्पन्नो भवेत् -

स्नातकपरीक्षायाः यस्मिन् कस्मिन्नपि वा स्तरे संस्कृतमेकतमविषयत्वेनाधीत्य वैधविश्वविद्यालयस्य कस्यापि स्नातकपरीक्षामुत्तीर्णोऽथवाऽध्ययनविषयेषु संस्कृतमेकतमविषयत्वेनाधीत्य समकक्ष्यपरीक्षां कामप्युत्तीर्णः

**अथवा**

स्नातकपरीक्षोत्तीर्णतानन्तरं यस्मात् कस्मादपि वैधविश्वविद्यालयादतिरिक्त बी.ए. परीक्षां संस्कृत विषयाध्ययनेनोत्तीर्णः

**अथवा**

यस्मात् कस्मादपि वैधविश्वविद्यालयात् संस्कृतपदव्युत्तरपरीक्षाया आद्यहायनपरीक्षामुत्तीर्णः

**अथवा**

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य संस्कृतविशारदपरीक्षामथवा यस्य कस्यापि वैध विश्वविद्यालयस्य समकक्ष्यपरीक्षामुत्तीर्णः

**अथवा**

यस्य कस्यापि वैधविश्वविद्यालयस्य संस्कृतशास्त्रिपरीक्षामथवा तत्समकक्ष्यत्वेनाभिमतामुत्तीर्णः परीक्षाम्।

४. परीक्षाशुल्कमतिरिक्तशुल्कमथ प्रवेशरीतिर्नियमाश्च तत्तत्काले व्यवस्थापनपरिषद्विद्वत्परिषद्भ्यां स्वीकृतनिर्णयानुसारं भविष्यन्ति। यदा क्वचिदेषां शुल्कानां स्वरूपे भविता परिवर्तनं तत् तत्संबद्धेभ्योऽवश्यमावेदयिष्यते।

५. सैद्धान्तिकस्वरूपभागः प्रात्यक्षिककृतिरेवमान्तरनिरूपणमित्यस्याःपरीक्षायाः भविष्यन्ति त्रयो भागास्तेषाञ्च गुणनिरूपणमित्थं भविष्यति -

| | | | |
|---|---|---|---|
| १. सैद्धान्तिकस्वरूपभागः | - | ६०० गुणाः | 'अ' भागः |
| २. प्रात्यक्षिककृतिः | - | ३०० गुणाः | 'ब' भागः |
| ३. क्षेत्रानुभवः (आन्तरनिरूपणम्) | - | (३०० गुणाः | 'क' भागः) |

परिणामे गुणपत्रिकायां स्तरमाध्यमेन

पूर्णगुणाः **९०० गुणाः** (Grade System) दर्शनीयम्

६. शिक्षणस्नातक (शिक्षाशास्त्री) प्रथमसैद्धान्तिकभागपरीक्षार्थमेवं प्रतिविषयं शतगुणानां भविष्यन्ति पत्राण्येतादृंशि –

| | |
|---|---|
| प्रश्नपत्रं प्रथमम् - अध्याधुनिकभारतीयसमाजे शिक्षकः | १०० गुणाः |
| प्रश्नपत्रं द्वितीयम् - अध्येतृमनस्तत्त्वमथाध्ययनक्रमः | १०० गुणाः |
| प्रश्नपत्रं तृतीयम् - वर्तमानाध्ययनरीतिरथ निर्वाहः | १०० गुणाः |
| प्रश्नपत्रं चतुर्थम् - शिक्षणयान्त्रिकतावश्यकताः मूल्यनिर्धारणं च | १०० गुणाः |
| प्रश्नपत्रं पञ्चमम् - संस्कृताध्ययनमथसंस्कृतपाठनक्रमः | १०० गुणाः |
| प्रश्नपत्रं षष्ठम् - अधोनिर्दिष्टविषयेभ्यो विद्यालयविषयद्वयस्याध्यापन क्रमः - (५० + ५०) | १०० गुणाः |
| **पूर्णगुणाः** | **६०० गुणाः** |

| | | | |
|---|---|---|---|
| १. संस्कृतम् (अनिवार्यम्) | २. मराठी | ३. हिन्दी. | ४. इंग्रजी |
| ५. पालिप्राकृते | ६. रसायनशास्त्रम् | ७.भौतिकशास्त्रम् | ८. जीवभौतिकशास्त्रम् |
| ९. गणितशास्त्रम् | १०. गृहविज्ञानशास्त्रम् | ११. इतिहास: | १२. भौगोलिकशास्त्रम् |
| १३. पौरशास्त्रम् | १४. अर्थशास्त्रम् | १५. संगीतम् | १६. वाणिज्यशास्त्रम् |

तत्तच्छैक्षणिकवर्षाभ्यासक्रमानुसारमेकैकस्यापि प्रश्नपत्रस्य विषयमर्यादा भविता।

७. विद्यालयविषयाध्यापनक्रमार्थमभिप्रपित्सुर्विद्यार्थी ऐच्छिकविषयद्वयं परीक्षार्थं चिनुयात् यस्मादेकतरं महाविद्यालयस्याथवा उच्चविद्यालयस्तरे पाठ्यमानं भवेत्। उपरिनिर्दिष्टानुसारमनिवार्य-संस्कृताध्ययनक्रमेण साकमेतद्विषयद्वयमपि विद्यार्थिना चितं भवतु।

८. 'ब' विभागस्य प्रात्यक्षिक परीक्षासु अन्तिमपरीक्षा च विषयत्रये प्रत्येकं शतगुणानां प्रकारेण भविष्यति।
अन्तिमपरीक्षा - १०० + १०० + १०० = ३०० (प्रत्यध्यापनपद्धतिशतगुणक्रमेण पद्धति त्रयम्)
पूर्ण गुणा: ३००

९. संस्कृतमराठींग्राजीभाषासु प्रश्नपत्राणि निर्मीयन्ते यया कयाप्येताभ्य: भाषया विद्यार्थी प्रश्नान् समाधातुमर्हति।

१०. १. शिक्षकाले तत्तदुपवेशनकार्यस्वरूपत: आन्तरनिरूपणाभिधतृतीयभागे ह्यनुष्ठानं निर्धारयिष्यते।
२. सैद्धन्तिकपरीक्षारम्भतो न्यूनातिन्यूनं पञ्चदशदिनेभ्य: प्राक् परीक्षार्थिनामान्तरनिरूपणं विश्वविद्यालयनिर्दिष्टप्रकारेण प्रत्येकशीर्षकमवाप्त गुणनिदर्शनपुरस्सरं तालिकास्वरूपेण समर्पणीयम्।
१. उपरिनिर्दिष्ट प्रश्नपत्राणां शीर्षकाणि विषयाश्च तदनन्तरभाविप्रत्यध्ययनसमितिसभमर्हन्ति परिवर्तनम्।
शिक्षणकालेऽधिवेशनकार्यगुणा ह्यधोनिर्दिटविभागभाजो भविष्यन्ति –

| | |
|---|---|
| १. कार्यक्रमनिर्वहणम् | १५ गुणा: |
| २. मनस्तत्त्वशास्त्रानुसारिप्रयोगा: (पञ्च) | १५ गुणा: |
| ३. अध्यापनोपकरणानि - | |
| अ) द्वौ वेलापटौ: (संस्कृते अनिवार्य:) | १० गुणा: |
| ब) प्रतिसमूहमेकमातृका | १० गुणा: |
| ४. निर्दिष्टानि | ३० गुणा: |
| ५. अन्तर्बीक्षणम् | १० गुणा: |
| ६. मध्यमपरीक्षाद्वयम् | २० गुणा: |
| ७. प्रकल्प: | १० गुणा: |
| ८. अभ्यासपाठनम् (त्रीणि ६० x ३) | १८० गुणा: |

**पूर्ण गुणा: (क-भाग:) ३०० गुणा:)** गुणपत्रिकायां, परिणामप्रमाणपत्रे स्तरमाध्यमेन (Grade Systems) दर्शनीयम्।

सूचना – तालिकानिर्दिष्टतृतीयचतुर्थसप्तमक्रमाङ्कानुबद्धलेखप्रमाणानि सर्वाण्यपि विश्वविद्यालयादेशानुसारं सत्यापनार्थं तत्तन्महाविद्यालयैर्मूल्यनिर्धारणानन्तरं विश्वविद्यालयाय समर्पणीयानि।

११. अधोनिदिष्टसमयानुसारं परीक्षायामुत्तीर्णतायै प्रत्येकं विद्यार्थिना सर्वभागेषु प्रत्येकभागमुत्तीर्णताऽवश्यकी –

अ) परीक्षाया: 'अ' भागे पूर्णत: षट्सैद्धान्तिक प्रश्नपत्रेषु प्रत्येकं पञ्चचत्वारिंशद्गुणा: प्रतिशतमाप्तव्या:।

ब) एकं संस्कृतस्य (पञ्चमम्) द्वयं षष्ठप्रश्नपत्रे चितेषु द्वयस्य च प्रश्नपत्रस्य परीक्षायां प्रात्यक्षिककृतौ विद्यार्थिना प्रत्येकं पञ्चचत्वारिंशद्गुणा: प्रतिशतमाप्तव्या:।

क) 'अ-ब' भागद्वयस्यान्तिमपरीक्षायामवाप्तसंयुक्तगुणसमाहाराधारेण भविष्यति सफलतया परीक्षामुत्तीर्णस्य श्रेणी।

ड) 'क' भागे विद्यार्थिनावाप्तपूर्णगुणनिर्देशनमङ्कपत्रे स्तररूपेण भविष्यति।
'अ' स्तर: - ७५ प्रतिशतादधिकम्
'ब' स्तर: - ७४ प्रतिशतान्न्यूनमथ ६० प्रतिशतादधिकम्

'क' स्तर: - ५९ प्रतिशतान्न्यूनमथ ४५ प्रतिशतादधिकम्
'ड' स्तर: - ४४ प्रतिशतात् न्यूनम्

य) 'ड' स्तरे स्थापित: छात्र: अनुत्तीर्ण:। तेन पुनरपि 'ड' स्तरे उत्तीर्णेन भाव्यं।

सूचना – विद्यार्थिनाऽध्यापने समापिते तत्तद्विद्यालये तत्तच्छात्रेण प्रात्यक्षिकपाठा: समापिता इति तत्तन्महाविद्यालयेन तत्तद्विद्यालयात् प्रात्यक्षिकपाठसमापनपमाणपत्रं विश्वविद्यालयाय समर्पणीयम्। एतच्च चरमप्रात्यक्षिकपरीक्षारम्भत:न्यूनातिन्यूनमेकसप्ताहात् प्राक् विश्वविद्यालये तत्तन्महाविद्यालयेन समर्पणीयं भवति।

१२. सैद्धान्तिकप्रात्यक्षिकान्तरनिरूपणाख्यभागद्वये समाहारत: षष्टिप्रतिशतगुणानथवा ततोऽप्यधिकानधिगम्योत्तीर्णवत: परीक्षां भविष्यति प्रथमश्रेणी। षष्टिप्रतिशतगुणेभ्यो न्यूनानथ पञ्चाशत्प्रतिशतगुणेभ्योऽन्यूनां चाप्तवत: गुणान् भविष्यति द्वितीयश्रेणी। पञ्चाशत्प्रतिशतगुणेभ्यो न्यूनांश्चाप्तवत: गुणान् भविष्यति द्वितीयश्रेणी। पञ्चाशत्प्रतिशतगुणेभ्यो न्यूनानथ पञ्चचत्वारिंशत्प्रतिशतगुणेभ्योऽन्यूनान् समाहारत: प्राप्तवतो गुणान् भविष्यति तृतीयश्रेणी। यथावश्यकं परीक्षासंबद्धनियमा: अन्ये चान्विता: भवन्ति।

१३. २००२ वर्षस्याष्टत्रिंशत्संख्यकस्य मूलाध्यादेशस्य संविधानं यदस्याध्यादेशस्य संशोधितस्य संविधानस्य पुरतस्तन्निरस्यते, यदाप्रभृति खल्वयमध्यादेश: विद्वत्परिषद्व्यवस्थापनपरिषद्भ्यां स्वीकृतनिर्णयानुसारं प्रभावि भवेत्। संशोधिताध्यादेशोऽयं भविता २००५-०६ शैक्षणिकवर्षात्।

## उद्देश्यानि हेतवश्च

उद्देश्यानि :-

१. संस्कृतभाषायां साहित्ये च प्रतिबिम्बितानां मूल्यानां, ज्ञानविज्ञानयोर्वीक्षणस्य च पुनरुज्जीवनं पोषणं परिव्यापनं च। वर्तमानभविष्यतोरावश्यकतानुलक्षं प्राचीनभारतीयाविज्ञानस्याधुनिकविज्ञानचिन्तनस्य च मध्ये प्रगतिशीलसमन्वयस्थापनम्।
२. संस्कृतसाहित्यलक्ष्यवैपुल्येन विज्ञानेन च प्रपूर्णानामथ संस्कृतशिक्षणक्रमानुच्चावचानत्यन्तमधिगत वतामथ च विद्यार्थिषु विशेषत: शालेयविद्यार्थिषु संस्कृतावश्यकतां प्रबोधयितुमुत्सहिष्णूनामाचार्याणां गणस्थापनम्।
३. राष्ट्रियसंघटितत्वस्य विज्ञानमनीषित्व-स्वतन्त्रचिन्तनत्वयोर्विशेषतस्तु गुरूशिष्यमध्यगतोदात्तसंबन्धस्य, अध्ययने शोधप्रवणमतीनां प्रतिभावर्धनस्य च वर्धापयिष्णुभावना: वीक्षणानि चाभिलक्ष्य शिक्षणक्रमस्य विकास: प्रचारश्च।
४. महाराष्ट्रगतसर्वविद्यालयेषु संस्कृतशिक्षकाणां विद्यार्थिनां च निर्माणम्।
५. संस्कृतशिक्षकनिर्माणेन संस्कृतस्य विभिन्नविभागानामध्यापनस्य सुविधाप्रकल्पनम्।
६. संस्कृतशिक्षणस्य पारम्परिकज्ञानस्य च विभिन्नरीतीनामुपलब्धेरावश्यक सुविधाकल्पनम्।

## हेतव:

स्वातन्त्र्यानन्तरमावश्यकसंख्यया विद्यालयेषु संस्कृतशिक्षकाणामभावहेतुतो महाराष्ट्रे संस्कृताध्ययनस्य महती हानिरजायत। तेषां विद्यालयेषु संस्कृतविषयमारब्धुं निर्वाहकाणामिच्छायां सत्यामपि संस्कृतशिक्षकाणामावश्यकसंख्याया: अभावेन संस्कृताध्ययनप्रगतिस्तु कुण्ठिताऽभवत्। एतन्महाहानि प्रहाणाय संस्कृतविश्वविद्यालयेन विश्वविद्यालयस्यास्य विधानुसारं (XXXIII – 1997) तत्तद्विषयेषु संस्कृतशिक्षणरीती: जानतां संस्कृतभाषासाहित्ययोरधिगतकौशलाना माचार्याणां निर्माणस्य निर्णयोऽकारि।

---

(आदेशस्य (अष्टात्रिंशत्संख्याकस्य) संशोधनानि विद्वत्परिषदा संसूचितानि २००३ ख्रिस्ताब्दस्य दिसेंबर पञ्चमदिनाङ्कस्य सभायां (५८ क्रमाङ्काश: दृश्यतां), २००३ दिसेंबर सप्तमदिनाङ्कस्य च व्यवस्थापनपरिषद: सभायामनुमतानि (९४ क्रमाङ्काश: दृश्यताम्). तदनु च संशोधनं २००५ मार्च चतुर्थदिनाङ्कस्य विद्वत्सभायां सूचितं (३ क्रमाङ्काश: दृश्यतां) २००५ जुलै अष्टमदिनाङ्कस्य व्यवस्थापनपरिषत्सभायामनुमतं च। संशोधिताध्यादेशोयम् २००५-०६ शैक्षणिक सत्रत: प्रभावी भविष्यति।)

---------

# त्रयस्त्रिंशत्तमोऽदेश: (२००२)
## योगनिसर्गोपचाराहारशास्त्रस्नातक

योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीपरीक्षानुषक्ताध्यादेशपरिकल्पनस्योपपन्नत्वाद् व्यवस्थापनपरिषदिममध्यादेशं परिकल्पयितुमित: प्रसीदति –

१. योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीपरीक्षानुषक्ताध्यादेशाभिध: (२००२) अध्यादेशोऽयं भविष्यति।

२. व्यवस्थापनपरिषन्निर्णीतिदिनाङ्कतोऽयमध्यादेशो भविता प्रभावी।

३. योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीपरीक्षा: क्रमश: एवं भविष्यन्ति –

अ) योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीपरीक्षा - प्रथमभाग:

ब) योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीपरीक्षा - द्वितीयभाग:

क) योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीपरीक्षा - तृतीयभाग:

ड) योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीपरीक्षा - चरमभाग:

४. अभ्यासक्रमोऽयं हायनचतुष्टयकालावध्यात्मक:। प्रथमभागान्ते योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीप्रथमभागपरीक्षा, द्वितीयभागान्ते योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीद्वितीयभागपरीक्षा, योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीतृतीयभागपरीक्षा, योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीचरमभागपरीक्षा च भविष्यन्ति।

५. स्वरूपतोऽस्याभ्यासक्रमस्यावैद्यकीयरूपेण निश्चितत्त्वादियं पदवी पदवीधरस्य कस्यापि कमपि प्रत्यौषधप्रदानयोग्यतां न प्रमाणयति। पदवीमिमामाप्तवत: कस्यापि वैद्यकीयाभ्यासयोग्यतां चायं विश्वविद्यालयो न परिकल्पयति।

६. योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीचरमभागपरीक्षा विश्वविद्यालयनिर्णीत्यनुसारं तत्तत्प्रदेशेषु तत्तत्स्थलेषु च ग्रीष्मर्तौ प्रतिहायनमेकदा भविष्यति।

७. तत्तत्कालानुगुणमस्याध्यादेशस्येतरप्रभाविनामध्यादेशानां समयानुषकतमस्या: परीक्षार्थी –

अ. योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीप्रथमभागस्य परीक्षार्थी महाराष्ट्रराज्यस्य माध्यमिकोच्चमाध्यमिकशिक्षणसमिते: द्वादशकक्षामुत्तीर्ण: अथवा तत्समकक्ष्यपरीक्षां कामपि भौतिकशास्त्ररसायनशास्त्रजीवभौतिकशास्त्रेषु प्रतिशतं पञ्चाशद्गुणानां प्रमाणेनोत्तीर्ण: (एस्.सी, एस्.टीविद्यार्थिनां कृते तु पञ्चचत्वारिंशद्गुणा: प्रतिशतम्)

ब. योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीद्वितीयभागस्य परीक्षार्थी विश्वविद्यालयस्य योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीप्रथम भागस्योत्तीर्ण: परीक्षामथवा कामपि तत्समकक्ष्यपरीक्षामुत्तीर्ण:।

क. योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीतृतीयभागस्य परीक्षार्थी विश्वविद्यालयस्य योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीद्वितीय भागस्योत्तीर्ण: परीक्षाम्।

ड. योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीचरमभागस्य परीक्षार्थी विश्वविद्यालयस्य योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीतृतीय भागस्योत्तीर्ण: परीक्षाम्।

उपरिनिर्दिष्टाभ्यासक्रमस्य परीक्षाप्रवेशार्थिनैकशिक्षणवर्षात् प्रागहर्तापरीक्षा भवतूत्तीर्णेति समय:।

८. अध्यादेशस्यास्यान्यपरिकल्पनानां पक्षपातित्वं विना ह्येतत्परीक्षासंबद्धाध्यादेशानां साधारण्येनैतत्परीक्षार्थमनुमतप्रवेशविद्यार्थिनामन्वयो ग्राह्य:।

९. तत्तत्कालेषु विश्वविद्यालयनिर्णीत्यनुसारमेतत्परीक्षाशुल्कप्रवेशशुल्कादिविविधकृत्यानां भविष्यति स्वरूपम्। तत्तन्निर्णीत्यनुसारमवकल्पितस्वरूपपरिवर्तनञ्चावेदयिष्यते सम्बन्धिभ्य:।

१०. परीक्षार्थमिमानि भावीनि प्रश्नपत्राणि (३५०० गुणा:)

अ. **योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीप्रथमभागपरीक्षा** (८०० गुणा:)

१. प्रथमप्रश्नपत्रम् - शरीरनिर्माणं संरचना जीवरसायनशास्त्रञ्च
(सिद्धान्त: १०० गुणा:)
(प्रात्यक्षिकम् - १०० गुणा:)

२. द्वितीयप्रश्नपत्रम् - निसर्गोपचारप्राथमिकसिद्धान्ता:

(सिद्धान्त: - १०० गुणा:)
(प्रात्यक्षिकम् - १०० गुणा:)

३. तृतीयप्रश्नपत्रम् - आहारशास्त्रप्राथमिकसिद्धान्ता:
(सिद्धान्त: - ६० गुणा:)
(प्रात्यक्षिकम् - ४० गुणा:)

४. चतुर्थप्रश्नपत्रम् - योगप्राथमिकसिद्धान्ता:
(सिद्धान्त: - १०० गुणा:)
(प्रात्यक्षिकम् - १०० गुणा:)

५. पञ्चमप्रश्नपत्रम् - प्राथमिकसंस्कृतम्
(सिद्धान्त: - १०० गुणा:)

ब. **योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीद्वितीयभागपरीक्षा** (९०० गुणा:)

१. प्रथमप्रश्नपत्रम् - शारीरिकोपचारनियमा:
(सिद्धान्त: १०० गुणा:)
(प्रात्यक्षिकम् - १०० गुणा:)

२. द्वितीयप्रश्नपत्रम् - निदानपञ्चकम्
(सिद्धान्त: - १०० गुणा:)
(प्रात्यक्षिकम् - १०० गुणा:)

३. तृतीयप्रश्नपत्रम् - स्वस्थवृत्तम्
(सिद्धान्त: - १०० गुणा:)
(प्रात्यक्षिकम् - १०० गुणा:)

४. चतुर्थप्रश्नपत्रम् - योगायुर्वेदौ
(सिद्धान्त: - १०० गुणा:)
(प्रात्यक्षिकम् - १०० गुणा:)

५. पञ्चमप्रश्नपत्रम् - आहारशास्त्रद्वितीयभाग:
(सिद्धान्त: - ६० गुणा:)
(प्रात्यक्षिकम् - ४० गुणा:)

क. **योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीतृतीयभागपरीक्षा** (९०० गुणा:)

१. प्रथमप्रश्नपत्रम् - पर्यायोपचारा:
(सिद्धान्त: १०० गुणा:)
(प्रात्यक्षिकम् १०० गुणा:)

२. द्वितीयप्रश्नपत्रम् - विकृतिविज्ञानम्
(सिद्धान्त: - १०० गुणा:)
(प्रात्यक्षिकम् - १०० गुणा:)

३. तृतीयप्रश्नपत्रम् - अष्टाङ्गयोग:
(सिद्धान्त: - १०० गुणा:)
(प्रात्यक्षिकम् - १०० गुणा:)

४. चतुर्थप्रश्नपत्रम् - सांसिद्धिकभेषजशास्त्रम्
(सिद्धान्त: - १०० गुणा:)
(प्रात्यक्षिकम् - १०० गुणा:)

५. पञ्चमप्रश्नपत्रम् - आहारशास्त्रतृतीयभाग:
(सिद्धान्त: - ६० गुणा:)
(प्रात्यक्षिकम् - ४० गुणा:)

ड. **योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीचरमपरीक्षा** (९०० गुणा:)

१. प्रथमप्रश्नपत्रम् - आहारशास्त्रचतुर्थभाग:
(सिद्धान्त: ४० गुणा:)
(प्रात्यक्षिकम् - ६० गुणा:)

२. द्वितीयप्रश्नपत्रम् - योगभेषजशास्त्रप्रयोग:

(सिद्धान्तः - १०० गुणाः)
(प्रात्यक्षिकम् - १०० गुणाः)
३. तृतीयप्रश्नपत्रम् - निरशनभेषजशास्त्रप्रयोगः
(सिद्धान्तः - १०० गुणाः)
(प्रात्यक्षिकम् - १०० गुणाः)
४. चतुर्थप्रश्नपत्रम् - अयस्कान्तमृद्वर्णभेषजशास्त्रप्रयोगः
(सिद्धान्तः - १०० गुणाः)
(प्रात्यक्षिकम् - १०० गुणाः)
५. पञ्चमप्रश्नपत्रम् - जलभेषजशास्त्रप्रयोगः
(सिद्धान्तः - १०० गुणाः)
(प्रात्यक्षिकम् - १०० गुणाः)

११. अ) अभ्यासक्रमसंसूचितसूचनानुसारं भविष्यति विषयाणामाशयः।
ब) संस्कृतमराठींग्रजीभाषाभ्योऽन्यतमास्याः भविष्यति परीक्षायाः माध्यमम् शिक्षणस्य च।
क) उपरिनिर्दिष्टप्रश्नपत्रनामपरिवर्तनं भाविवर्षेषु भवितुमर्हति।

१२. प्रत्येकमभ्यासक्रमप्रवेशार्हतास्वरूपमभ्यासक्रमे दीयते। प्रत्येकं सिद्धान्तपत्रमथ वा प्रात्यक्षिकमुत्तीर्णतायाः पृथक्-शीर्षकस्वरूपि। भाषापत्रे पञ्चत्रिंशत्प्रतिशतं गुणा उत्तीर्णतायाः अन्यत्र प्रत्येकशीर्षकमुत्तीर्णतायाः न्यूनातिन्यूनं चत्वारिंशत्प्रतिशतं गुणाः प्राप्तव्याः। प्रत्येकं सिद्धान्तप्रश्नपत्रकालावधिस्त्रिहोरात्मकस्तथा परीक्ष्यविषयश्च अभ्यासक्रमानुसारं भविष्यति। पदवीपरीक्षा च हायनचतुष्टयकालावधिकः। समाहारात्मकगुणाधारोत्तीर्णताप्रकल्पनं नास्ति। तत्तत्कालानुसार्यावश्यकपरीक्षास्वरूपपरीक्षाप्रश्नपत्र संख्यादिपरिवर्तनमभ्यासमण्डलद्वारा भवितुमर्हति तच्च तत्तत्काले प्रकटीकरिष्यते। परीक्षार्थी बुभूषो रेकस्मिन् विषये परीक्षावर्जनमनुमतं भवेद्यदि तस्मिन् विषये तेन निर्दिष्टोत्तीर्णता गुणाः प्राप्ताः। तच्च तत्परीक्षार्थिन ऐच्छिकम्। परीक्षायाः निर्दिष्टविषयेषु त्रिभ्यो द्वयमितिरीत्योत्तीर्णेन परीक्षार्थिना परीक्षायामनुत्तीर्णतायामागामिसमुच्छ्रयपरमावधिरक्षणमनुमतम् भवति। क्वचिज्जातोऽपूर्णाङ्कः परीक्षार्थिपक्षानुकूली भविष्यति। क्रमस्थापनार्थानुमतिश्च विद्यार्थिने पञ्चभ्यः प्रश्नपत्रत्रयस्योत्तीर्णतायामेव दीयते। एकस्यैवाभ्यासक्रमस्यानुक्रमिकवर्षद्वयस्य सपद्येव क्रमस्थापनार्थानुमतिर्नानुमता।

१३. बीएससीयोगनिसर्गोपचाराहारशास्त्राभिधविज्ञानस्नातकपदवीप्रथमद्वितीयतृतीयभागपरीक्षासु सफलतामाप्तवद्भ्यो विद्यार्थिभ्यो न भवति वर्गशो विभाजनम्।

१४. एतदध्यादेशानुसारिपरीक्षाप्रवेशेप्सुमहाविद्यालयछात्रस्तु यथानिर्देशमस्य शिक्षणविषयस्य प्रत्येकशिक्षणविषयं प्रतिप्रात्यक्षिकं च पञ्चसप्ततिप्रतिशतकालांशेषु अन्यूनतयोपस्थितो भूत्वाऽशीत्यधिकैकशतसफलदिनेषु कृताविरततद्विषयाध्ययनो भवेत्। संदर्भद्वयेऽपि तदुपस्थितिर्लिखितपरीक्षारम्भ दिनाङ्कात्पञ्चदशदिनेभ्यः प्राक्तनदिनाङ्कपर्यन्तमथवा तत्तच्छिक्षणावधिपर्यन्तं गणयिष्यते।

परीक्षार्थिछात्रनियन्त्रणबाह्यपरिस्थितिकारणेनोपस्थितिस्तस्य छात्रस्योपस्थितिर्न्यूना जातेति जातविश्वासो महाविद्यालयप्रांशुपालोऽथवा विश्वविद्यालयविभागप्रमुखस्तस्य छात्रस्योपस्थितौ पञ्चदशप्रतिशतोपस्थितिन्यूनतां क्षन्तुमर्हति। तादृशछात्राणामुपस्थितिन्यूनता परीक्षारम्भदिनाङ्कात् सप्ताहद्वितियात् प्राक् तेन प्रांशुपालेन विभागप्रमुखेन वा विश्वविद्यालयकुलसचिवं प्रति प्रेष्या।

१५. परीक्षाप्रवेशार्थावेदनपत्रसमर्पणञ्च तेन महाविद्यालयविद्यार्थिना तत्परीक्षासम्बन्धे विश्वविद्यालयेनोपनिर्दिष्ट दिनाङ्केष्वेव स्वमहाविद्यालयप्रांशुपालसमीपेऽथवा विश्वविद्यालयविभागसंबद्धछात्रेण तद्विभागप्रमुखस्य समीपे वा करणीयम्। तत्तत्कालानुगुणमुपनिर्दिष्टशुल्कसहितमावेदनपत्रमभ्यर्पणीयम्। एतदध्यादेशानुषक्तपरीक्षोत्तीर्ण-तापरीक्षा तु तेन परीक्षार्थिनोत्तार्या।

१६. एतदध्यादेशानुषक्तपरीक्षोत्तीर्णतासमनन्तरं विश्वविद्यालयेन स्वनियमानुसारमायोजिते स्नातकोत्सवे पदवी तस्मै सफलछात्राय प्रदीयते तस्यानुपस्थितौ च तदनन्तरं तस्मै छात्राय दीयते।

१७. परीक्षायां षष्टिगुणानथवाऽधिकाँस्तत: प्राप्तवत: समाहारत: प्रथमश्रेणी, षष्टिगुणेभ्योन्यूनानथ पञ्चाशद्गुणेभ्योऽधिकानाप्तवतो द्वितीयश्रेणी च भविष्यत:। तदितरसफलछात्राणां तृतीयश्रेणी भविष्यति। प्रथमद्वितीयतृतीयभागपरीक्षासामाहारगुणाधारं च चरमपरीक्षाश्रेणी निश्चेष्यते।

१८. एकस्मिन् समये एव सर्वविषयेषु परीक्षामुत्तीर्णानां तत्तद्विषयगुणेभ्यो पञ्चसप्ततिप्रतिशतगुणानामाप्तौ तद्विषये विशिष्टतयोत्तीर्णताया: उद्घोषणं भविष्यति।

१९. एकस्या: परीक्षाया: अर्धभागीयप्रश्नपत्रेषु उत्तीर्णताया:गुणानाप्तवान् विद्यार्थी प्रगतवर्षपरीक्षोत्तीर्णताया मग्रिमोच्चतरवर्गप्रवेशायानुमतो भविष्यति।
विवरणानि –
१. योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीप्रथमद्वितीयतृतीयभागपरीक्षासु विषयेषु विशिष्टोत्तीर्णताया: प्रदानं न भविष्यति।
२. योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीचरमभागपरीक्षायां विशिष्टतानिर्धारणम् बीएससीयोगनिसर्गोपचाराहारशास्त्राभिधविज्ञानस्नातक पदवीप्रथमद्वितीयतृतीयचरमभागपरीक्षास्ववाप्तगुणानामाधारेण भविष्यति।

२०. परीक्षोत्तीर्णताया: कृते अतिरिक्तावश्यकगुणप्राप्तिनियमविषयेऽथवोच्चस्तरप्राप्तिविषयेऽथवैकस्मिन्नपि विषये विशिष्टतासम्पादनस्य कृते आवश्यकनियमा: तत्संबद्धतत्तदध्यादेशानुसारं भविष्यन्ति।
१. उच्चस्तरप्राप्तेरथवा विशिष्टतासंपादनस्याथवा कस्यापि विभागस्योत्तीर्णताया: कृते आवश्यकातिरिक्तगुणविस्तार: तत्प्रश्नपत्रस्य पूर्णगुणेषु समाहृतगुणेषु च दर्शयिष्यते।
२. आवश्यकातिरिक्तगुणप्राप्त्योत्तीर्णा:परीक्षां गुणवत्तासूचीमध्ये निर्देशं नार्हन्ति।
३. आवश्यकातिरिक्तगुणप्राप्त्योत्तीर्णा:परीक्षां कस्यापि विश्वविद्यालयस्य छात्रवृत्ते: पदकानां पारितोषिकाणां कृते वा एतत्परीक्षासंबद्धान्यविश्वविद्यालय प्रदेयपारितोषिकाणां कृते वाऽर्हा: न भवन्ति।
४. कस्यामपि परीक्षायामेकस्मिन् विषयेऽवाप्तुं मोचनमावश्यकातिरिक्तगुणा: नानुमन्यन्ते।
५. उच्चस्तरावाप्त्यायथवा विशिष्टोत्तीर्णतायैप्रदत्तावश्यकातिरिक्तगुणास्तत्परीक्षासंबद्धछात्रवृत्ति पदकपारितोषिकपुरस्काराणां कृते अगण्या: भवन्ति।

२१. परीक्षामनुत्तीर्णोऽथवाऽनुपस्थित: परीक्षायां तत्तत्कालानुगणं विश्वविद्यालयनिर्दिष्टपरीक्षाशुल्कादिनवीन शुल्कादिभरणोत्तरमनन्तरपरीक्षायामकृतनियताध्ययनोऽपि बहि:शालछात्ररूपेणोपस्थातुमर्हति। प्रात्यक्षिकपरीक्षाया: मौखिकपरीक्षाया: वा केन्द्रनामोल्लेखस्तत्परीक्षावेदनपत्रे सुस्पष्टतया करणीय इति नियमोऽत्रानुषज्यते।
२२. न्यूनातिन्यूनकालावधौ प्रथमप्रयत्ने एव ग्रीष्मपरीक्षामुत्तीर्णा एव पारितोषिकपदकादिकृते भवन्त्यर्हा:।

२३. एतद्विश्वविद्यालयप्रदत्तमूलपत्रहानिप्रसङ्गे प्रतिकृतप्रतिमवाप्तुंतत्तत्काले विश्वविद्यालयनिर्दिष्टशुल्कभरणेन प्रति:साऽवाप्तुं शक्या।

२४. यथासंभवं परीक्षासमाप्त्यनन्तरमयं विश्वविद्यालयो ह्युत्तीर्णविद्यार्थिसूचीमेकां विभागत्रये विनिर्दिश्य प्रकाशयिष्यति। न्यूनातिन्यूनतयोपनिर्दिष्टकाले निर्दिष्टप्रथमद्वितीयश्रेणीमध्ये प्राप्तस्थलानां परीक्षामुत्तीर्णानां नामनिर्देश: गुणवत्तानुसारमेतन्नियमबद्धमेवं भविष्यति –
१. गुणवत्तासूचीमध्ये नामनिर्देशनार्थमर्हताया:कृतेऽभ्यासक्रमपरीक्षाया: सम्पूर्त्यर्थमावश्यकन्यूनातिन्यून-कालावधिरेव गण्यो भवति। निरवधानतया तदभ्यासक्रमोत्तीर्णताया: कृते आवश्यककालावधिरेव न्यूनातिन्यूनकालावधितया भाव्यते। तदर्थं च परीक्षार्थिना सा परीक्षा तत्तद्विमोचनक्रमेणो त्तीर्णा तत्पूर्ववर्षेष्वनुत्तीर्णा च मा भूत्। तदभ्यासक्रमान्तर्गतपरीक्षामात्रस्यानुत्तीर्णताकारणेन विद्यार्थी गुणवत्तासूचीमध्ये नामनिर्देशं नार्हति।
२. गुणवत्तासूचीमध्ये स्थानक्रमसंख्याप्रकाशननिबन्धनानि –

अ. शतातन्न्यूनपरीक्षार्थिसंख्यायुता परीक्षा चेद्गुणवत्तासूचीमध्ये पञ्चस्थानानि।

ब. एकशताधिकोत्तरपरीक्षार्थिसंख्यायुक्तपरीक्षा चेद् गुणवत्तासूचीमध्ये भविष्यन्ति दशस्थानानि।

सा च गुणवत्तासूची ग्रीष्मकालपरीक्षाया एव भविष्यति।

२५. एतत्परीक्षामथवान्यविश्वविद्यालयपरीक्षामुत्तीर्णः पूर्वमेवैतत्परीक्षाप्रवेशंनार्हति यदि सः एतदध्यादेश नियमानुषङ्गी न भवति।

२६. योगनिसर्गोपचाराहारशास्त्राभिधस्नातकपदवीप्रथमद्वितीयतृतीयभागपरीक्षाः उत्तीर्णाः कुलसचिव-सकाशान्निर्दिष्टपत्रे गुणप्रकाशनमवाप्तुमर्हन्ति। चरमपरीक्षामस्याभ्यासक्रमस्योत्तीर्णास्तत्तत्कालानुसारि निर्जीतशुल्कभरणेन कुलगुरुहस्ताक्षराङ्कित पत्रद्वारास्नातकोत्सवे पदवीं प्राप्तुमर्हन्ति।

२७. एतदध्यादेशप्रभाविप्रवृत्तिदिनाङ्कतः पूर्वं कुलगुरुणैतत्परीक्षापरीक्षान्तरसंबंधे कृतप्रकाशितनिर्देशनं (१४(८) विभागानुसारं) निरस्तं भवति।

----------

## उद्दिष्टानि हेतवश्च

विश्वविद्यालये संलग्नितमहाविद्यालयेषु च पदवीपदविकाप्रमाणपत्रादिविद्याविषयकविषयाणामध्ययनार्थ प्रवेशानुषक्ताध्यादेशसंरचना महाराष्ट्रसंविधानुसारं संख्या XXXIII (1997) 46 विभागस्य अवान्तरविभागः (१)

१. संस्कृतभाषायां साहित्ये च प्रतिबिम्बितानां मूल्यानां, ज्ञानविज्ञानयोर्वीक्षणस्य च पुनरुज्जीवनं पोषणं परिव्यापनं च। वर्तमानभविष्यतोरावश्यकतानुलक्षं प्राचीनभारतीयाविज्ञानस्याधुनिकविज्ञानचिन्तनस्य च मध्ये प्रगतिशीलसमन्वयस्थापनम्।

२. संस्कृतसाहित्यलक्ष्यवैपुल्येन विज्ञानेन च प्रपूर्णानामथ संस्कृतशिक्षणक्रमानुच्चावचानत्यन्तमधिगत वतामथ च विद्यार्थिषु विशेषतः शालेयविद्यार्थिषु संस्कृतावश्यकतां प्रबोधयितुमुत्सहिष्णूनामाचार्याणां गणस्थापनम्।

३. भूतकालं वर्तमानेन संयोजयतः भविष्यत्कालाह्वानानि च अभिमुखीभूय परिष्कर्तुं राज्यं सशक्ती कुर्वाणस्य संस्कृताध्ययनस्य समस्तक्षेत्रेषु सर्जनात्मकतायाः परिशोधनस्याविष्करणस्य च प्रोत्साहनं प्रवर्धनं च।

४. परस्परसंबद्धाध्ययनपद्धतिद्वारा जीवनोपयोगिसमन्वयात्मकवीक्षणसात्मीकरणेन प्रकाशकवदभिवर्धनम्। भारतस्य पुनर्जागरणं पुनरुज्जीवनं च जनयितुमन्यविभागेषु कार्यरतेषु विशिष्टजनेषु शिक्षकवर्गे च वीक्षणस्यास्य वितरणमभिव्यप्तिश्च।

५. निसर्गोपचाराहारशास्त्रमायुर्वेदस्य समन्वयसंसाधनार्थमावश्यकविशिष्टाभ्यासक्रमाणां संरचना निर्वाहणं च।

६. छात्रनागरिकेषु विशिष्टजागरणानिर्माणार्थमावश्यकाभ्यासक्रमाणां संरचना यया समाजसामान्यजागरण निर्माणशौण्डास्ते भवेयुः।

---

**एकत्रिंशत्संख्याकस्यास्यदेशस्य संशोधनानि विद्वत्परिषदा २००२ तमख्रिस्ताब्दस्य जूनमासस्य दशमदिनाङ्कस्य सभायां संसूचितानि (११ क्रमाङ्काशः दृश्यताम्), तथा २००२ तमख्रिस्ताब्दस्य जूनमासस्य एकादशदिनाङ्कस्य व्यवस्थापनपरिषदः सभायामनुमतानि (४६ क्रमाङ्काशः दृश्यताम्)। संशोधिताध्यादेशोयम् २००२ तमख्रिस्ताब्दस्य जूनमासस्य दशमदिनाङ्कतः प्रभावी भविष्यति।) अध्यादेशस्यास्य संशोधनं च विद्वत्परिषदा २००३ तमख्रिस्ताब्दस्य दिसेंबरमासस्य पञ्चमदिनाङ्कस्य सभायां जातम् (५८ क्रमाङ्काशः दृश्यताम्) तथा २००३ तमख्रिस्ताब्दस्य दिसेंबरमासस्य सप्तमदिनाङ्कस्य व्यवस्थापनपरिषदः सभायामनुमतानि (९४ क्रमाङ्काशः दृश्यताम्)।**

---------

**एकत्रिंशत्तमः आदेशः (२००२)**

# बी.ए. प्रशासकीयसेवा (बी.ए.सिव्हीलसर्व्हीसेस)

निर्देशयिष्यमाणप्रयोजनानुषक्त**बी.ए.प्रशासकीयसेवा**नामकाभ्यासक्रमपदवीसंप्राप्त्यर्थपरीक्षाध्यादेशसंशोधनस्योपपन्नत्वात् अनुवर्तमानाध्यादेशसंशोधनार्थमियं व्यवस्थापनपरिषदित:प्रसीदति –

१. कलासङ्काये बी.ए.प्रशासकीयसेवापदव्य्यर्थपरीक्षाणामयं संशोधिताध्यादेशाभिधोऽयमध्यादेश: २००२ भवतु।

२. व्यवस्थापनपरिषन्मान्यताप्राप्तिदिनाङ्कात्प्रभृत्यमध्यादेश: प्रवर्तिष्यते। इत: प्रभृति बी.ए. सिव्हील सर्व्हीसेसनामकपदवीयम् प्रशासकीयसेवापदवीनाम्ना व्यवहरिष्यते।

३. बी.ए.प्रशासकीयसेवापदव्य्यर्थपरीक्षा चेत्थंविधा भविष्यति -

अ) बी.ए.प्रशासकीयसेवापदवी – प्रथमभागपरीक्षा

ब) बी.ए.प्रशासकीयसेवापदवी – द्वितीयभागपरीक्षा

क) बी.ए.प्रशासकीयसेवापदवी – चरमभागपरीक्षा

४. अभ्यासक्रमोऽयं हायनत्रयकालावध्यात्मक:। प्रथमभागान्ते बी.ए.प्रशासकीयसेवापदवीप्रथमभागपरीक्षा, द्वितीयभागान्ते बी.ए.प्रशासकीयसेवापदवीद्वितीयभागपरीक्षा, बी.ए.प्रशासकीयसेवापदवीचरमभागपरीक्षा च भविष्यन्ति।

५. बी.ए.प्रशासकीयसेवापदव्य्यर्थपरीक्षा विश्वविद्यालयनिर्णीत्यनुसारं तत्तत्प्रदेशेषु तत्तत्स्थलेषु च ग्रीष्मर्तौ प्रतिहायनमेकदा भविष्यति।

६. तत्तत्कालानुगुणमस्याध्यादेशस्येतरप्रभाविनामध्यादेशानां समयानुषकतमस्या: परीक्षार्थी –

अ. बी.ए.प्रशासकीयसेवापदवीप्रथमभागस्य परीक्षार्थी महाराष्ट्रराज्यस्य माध्यमिकोच्चमाध्यमिकशिक्षणसमिते: द्वादशकक्षामुत्तीर्ण: अथवा तत्समकक्ष्यपरीक्षां कामप्युत्तीर्ण:।

ब. बी.ए.प्रशासकीयसेवापदवीद्वितीयभागस्य परीक्षार्थी विश्वविद्यालयस्य बी.ए.प्रशासकीयसेवापदवी प्रथमभागस्योत्तीर्ण: परीक्षाम्।

क. बी.ए.प्रशासकीयसेवापदवीचरमभागस्य परीक्षार्थी विश्वविद्यालयस्य बी.ए.प्रशासकीयसेवापदवी-द्वितीयभागस्योत्तीर्ण: परीक्षाम्।

उपरिनिर्दिष्टाभ्यासक्रमस्य परीक्षाप्रवेशार्थिनैकशिक्षणवर्षात् प्रागहर्तापरीक्षा भवतूत्तीर्णेति समय:।

७. अध्यादेशस्यास्यान्यपरिकल्पनानां पक्षपातित्वं विना ह्येतत्परीक्षासंबद्धाध्यादेशानां साधारण्येनैतत्परीक्षार्थमनुमतप्रवेशविद्यार्थिनामन्वयो ग्राह्य:।

८. तत्तत्कालेषु विश्वविद्यालयनिर्णीत्यनुसारमेतत्परीक्षाशुल्कप्रवेशशुल्कादिविविधकृत्यानां भविष्यति स्वरूपम्। तत्तन्निर्णीत्यनुसारमवकल्पितस्वरूपपरिवर्तनञ्चावेदयिष्यते सम्बन्धिभ्य:।

९. परीक्षार्थमिमानि भावीनि प्रश्नपत्राणि

अ. बी.ए.प्रशासकीयसेवापदवी प्रथमभागपरीक्षा

१. प्रथमप्रश्नपत्रम् - संस्कृतभाषा

२. द्वितीयप्रश्नपत्रम् - आंग्लम्

३. तृतीयप्रश्नपत्रम् - सामान्याध्ययनम्

४. चतुर्थप्रश्नपत्रम् - संस्कृतसाहित्यम्

**अधोनिर्दिष्टैच्छिकाध्ययनविषयद्वयम् -**

५. पञ्चमप्रश्नपत्रम् - राजनीतिशास्त्रम्
६. षष्टप्रश्नपत्रम् - सामान्यप्रशासनशास्त्रम्
७. सप्तमप्रश्नपत्रम् - समाजशास्त्रम्
८. अष्टमप्रश्नपत्रम् - तत्त्वज्ञानम्
९. नवमप्रश्नपत्रम् - इतिहास:
१०. दशमप्रश्नपम् - गणितम्
११. एकादशप्रश्नपत्रम् - सङ्ख्याशास्त्रम्

**सूचना – अधोनिर्दिष्टमिथ:सम्बन्धवद्विषया:परीक्षार्थिनामध्ययनार्थमनुमता: न –**
१. राजनीतिशास्त्रम् - सामान्यप्रशासनशास्त्रम्
२. गणितम् - सङ्ख्याशास्त्रम्

ब. बी.ए.प्रशासकीयसेवापदवीद्वितीयभागपरीक्षा
१. प्रथमप्रश्नपत्रम् - संस्कृतभाषा
२. द्वितीयप्रश्नपत्रम् - आंग्लम्
३. तृतीयप्रश्नपत्रम् - सामान्याध्ययनम्
४. चतुर्थप्रश्नपत्रम् - संस्कृतसाहित्यम्

**अधोनिर्दिष्टैच्छिकाध्ययनविषयद्वयम् -**
५. पञ्चमप्रश्नपत्रम् - राजनीतिशास्त्रम्
६. षष्टप्रश्नपत्रम् - सामान्यप्रशासनशास्त्रम्
७. सप्तमप्रश्नपत्रम् - समाजशास्त्रम्
८. अष्टमप्रश्नपत्रम् - तत्त्वज्ञानम्
९. नवमप्रश्नपत्रम् - इतिहास:
१०. दशमप्रश्नपम् - गणितम्
११. एकादशप्रश्नपत्रम् - सङ्ख्याशास्त्रम्

**सूचना – अधोनिर्दिष्टमिथ:सम्बन्धवद्विषया:परीक्षार्थिनामध्ययनार्थमनुमता: न –**
१. राजनीतिशास्त्रम् - सामान्यप्रशासनशास्त्रम्
२. गणितम् - सङ्ख्याशास्त्रम्

क. बी.ए.प्रशासकीयसेवापदवीचरमभागपरीक्षा
१. प्रथमप्रश्नपत्रम् - संस्कृतभाषा
२. द्वितीयप्रश्नपत्रम् - आंग्लम्
३. तृतीयप्रश्नपत्रम् - सामान्याध्ययनम्
४. चतुर्थप्रश्नपत्रम् - संस्कृतसाहित्यम्

**अधोनिर्दिष्टैच्छिकाध्ययनविषयद्वयम् -**
५. पञ्चमप्रश्नपत्रम् - राजनीतिशास्त्रम्
६. षष्टप्रश्नपत्रम् - सामान्यप्रशासनशास्त्रम्
७. सप्तमप्रश्नपत्रम् - समाजशास्त्रम्
८. अष्टमप्रश्नपत्रम् - तत्त्वज्ञानम्
९. नवमप्रश्नपत्रम् - इतिहास:
१०. दशमप्रश्नपम् - गणितम्
११. एकादशप्रश्नपत्रम् - सङ्ख्याशास्त्रम्

**सूचना – अधोनिर्दिष्टमिथ:सम्बन्धवद्विषया:परीक्षार्थिनामध्ययनार्थमनुमता: न –**

१. राजनीतिशास्त्रम् - सामान्यप्रशासनशास्त्रम्
२. गणितम् - सङ्ख्याशास्त्रम्

१०. अ) अभ्यासक्रमसंसूचितसूचनानुसारं भविष्यति विषयाणां मर्यादा।
ब) संस्कृतमराठींग्रजीभाषाभ्योऽन्यतमास्याः भविष्यति परीक्षायाः माध्यमम् शिक्षणस्य च।
क) उपरिनिर्दिष्टप्रश्नपत्रनामपरिवर्तनं भाविवर्षेषु भवितुमर्हति।

११. प्रत्येकमभ्यासक्रमप्रवेशार्हतास्वरूपमभ्यासक्रमे दीयते। शतगुणात्मकमेकैकप्रश्नपत्रं भवति। प्रत्येक प्रश्नपत्रानुविधायि भवत्युत्तीर्णता। पञ्चत्रिंशत्प्रतिशतं गुणा उत्तीर्णतायाः कृते प्राप्तव्याः। प्रत्येकं प्रश्नपत्रकालावधि स्त्रिहोरात्मकस्तथा प्रत्येकवर्षपरीक्षासमाहृतगुणाः षट्शतं भविष्यन्ति। पदवीपरीक्षा च हायनत्रयकालावधिकः। समाहारात्मकगुणाधारोत्तीर्णताप्रकल्पनं नास्ति। तत्तत्कालानुसार्यावश्यकपरीक्षास्वरूपपरीक्षाप्रश्नपत्र संख्यादिपरिवर्तनमभ्यासमण्डलद्वारा भवितुमर्हति तच्च तत्तत्काले प्रकटीकरिष्यते। परीक्षार्थी बुभूषो रेकस्मिन् विषये परीक्षावर्जनमनुमतं भवेद्यदि तस्मिन् विषये तेन निर्दिष्टोत्तीर्णता गुणाः प्राप्ताः। तच्च तत्परीक्षार्थिन ऐच्छिकम्। परीक्षायाः निर्दिष्टविषयेषु त्रिभ्यो द्वयमितिरीत्योत्तीर्णेन परीक्षार्थिना परीक्षायामनुत्तीर्णतायामागामि समुच्छ्रयपरमावधिरक्षणमनुमतम् भवति। क्वचिज्जातोऽपूर्णाङ्कः परीक्षार्थिपक्षानुकूली भविष्यति। क्रमस्थापानार्थानुमतिश्च विद्यार्थिने पञ्चभ्यः प्रश्नपत्रत्रयस्योत्तीर्णतायामेव दीयते। एकस्यैवाभ्यासक्रमस्यानु क्रमिकवर्षद्वयस्य सपद्येव क्रमस्थापनार्थानुमतिर्नानुमता। क्रमरिरक्षिषुविद्यार्थिना षट्प्रश्नपत्रेभ्यःचत्वार्युत्तार्यानि।

१२. बी.ए. प्रशासकीयसेवापदवीप्रथमद्वितीयभागपरीक्षासु सफलतामाप्तवद्भ्यो विद्यार्थिभ्यो न भवति वर्गशो विभाजनम्।

१३. एतदध्यादेशानुसारिपरीक्षाप्रवेशेप्सुमहाविद्यालयछात्रस्तु यथानिर्देशमस्य शिक्षणविषयस्य प्रत्येकशिक्षणविषयं प्रतिप्रात्यक्षिकं च पञ्चसप्ततिप्रतिशतकालांशेषु अन्यूनतयोपस्थितो भूत्वाऽशीत्यधिकैकशतसफलदिनेषु कृताविरततद्विषयाध्ययनो भवेत्। संदर्भद्वयेऽपि तदुपस्थितिर्लिखितपरीक्षारम्भदिनाङ्कात्पञ्चदशदिनेभ्यः प्राक्तनदिनाङ्कपर्यन्तमथवा तत्तच्छिक्षणावधिपर्यन्तं गणयिष्यते।

परीक्षार्थिछात्रनियन्त्रणबाह्यपरिस्थितिकारणेनोपस्थितिस्तस्य छात्रस्योपस्थितिर्न्यूना जातेति जातविश्वासो महाविद्यालयप्रांशुपालोऽथवा विश्वविद्यालयविभागप्रमुखस्तस्य छात्रस्योपस्थितौ पञ्चदशप्रतिशतोपस्थितिन्यूनतां क्षन्तुमर्हति। तादृशछात्राणामुपस्थितिन्यूनता परीक्षारम्भदिनाङ्कात् सप्ताहद्वितयात् प्राक् तेन प्रांशुपालेन विभागप्रमुखेन वा विश्वविद्यालयकुलसचिवं प्रति प्रेष्या।

१४. परीक्षाप्रवेशार्थावेदनपत्रसमर्पणञ्च तेन महाविद्यालयविद्यार्थिना तत्परीक्षासम्बन्धे विश्वविद्यालयेनोपनिर्दिष्ट दिनाङ्केष्वेव स्वमहाविद्यालयप्रांशुपालसमीपेऽथवा विश्वविद्यालयविभागसंबद्धछात्रेण तद्विभागप्रमुखस्य समीपे वा करणीयम्।

१५. एतत्पदवीपरीक्षाबहिःशालछात्रप्रवेशेच्छुछात्रैरस्य विश्वविद्यालयस्य बहिःशालछात्ररूपेण अधिकृतपञ्जीकरण मावश्यकम्।

अ) एतदध्यानुदेशानुषक्तमेतत्परीक्षाप्रवेशार्थिनैतद्विविश्वविद्यालयसूचनानुसार्यावश्यकशुल्क प्रमाणपत्रादिसहितमावेदनपत्रम् निर्दिष्टस्वरूपेण पञ्जीकरणार्थं कुलसचिवाय समर्पणियम्।
ब) एतदध्यादेशानुषक्तपरीक्षोत्तीर्णतासमनन्तरं विश्वविद्यालयेन स्वनियमानुसारमायोजिते स्नातकोत्सवे पदवी तस्मै सफलछात्राय प्रदीयते तस्यानुपस्थितौ च तदनन्तरं तस्मै छात्राय दीयते यदर्थं विश्वविद्यालयाय पृथग्रूपेण शुल्कमापूर्य भवति।

१६. परीक्षायां प्रतिशतं षष्टिगुणानथवाऽधिकाँस्ततः प्राप्तवतः समाहारतः प्रथमश्रेणी, षष्टिगुणेभ्यो न्यूनानथ पञ्चचत्वारिंशद्गुणेभ्योऽधिकानाप्तवतो द्वितीयश्रेणी च भविष्यतः। तदितरसफलछात्राणां तृतीयश्रेणी भविष्यति। प्रथमद्वितीयचरमभागपरीक्षासामाहारगुणाधारं च चरमपरीक्षाश्रेणी निश्चेष्यते।

१७. एकस्मिन् समये एव सर्वविषयेषु परीक्षामुत्तीर्णानां तत्तद्विषयगुणेभ्यो पञ्चसप्ततिप्रतिशतगुणानामाप्तौ तद्विषये विशिष्टतयोत्तीर्णतायाः उद्घोषणं भविष्यति।

विवरणानि –

अ. बी.ए.प्रशासकीयसेवापदवीप्रथमद्वितीयभागपरीक्षाविषयेषु विशिष्टोत्तीर्णतायाः प्रदानं न भविष्यति।

ब. बी.ए.प्रशासकीयसेवापदवीचरमभागपरीक्षायां विशिष्टतानिर्धारणम् बी.ए.प्रशासकीयसेवापदवी प्रथमद्वितीयचरमभागपरीक्षास्ववाप्तगुणानामाधारेण भविष्यति।

१८. परीक्षोत्तीर्णतायाः कृते अतिरिक्तावश्यकगुणप्राप्तिनियमविषयेऽथवोच्चस्तरप्राप्तिविषयेऽथवैकस्मिन्नपि विषये विशिष्टतासम्पादनस्य कृते आवश्यकनियमाः तत्संबद्धतत्तदध्यादेशानुसारं भविष्यन्ति।

१. उच्चस्तरप्राप्तेरथवा विशिष्टतासंपादनस्याथवा कस्यापि विभागस्योत्तीर्णतायाः कृते आवश्यकातिरिक्तगुणविस्तारः तत्प्रश्नपत्रस्य पूर्णगुणेषु समाहृतगुणेषु च दर्शयिष्यते।

२. आवश्यकातिरिक्तगुणप्राप्त्योत्तीर्णाःपरीक्षां गुणवत्तासूचीमध्ये निर्देशं नार्हन्ति।

३. आवश्यकातिरिक्तगुणप्राप्त्योत्तीर्णाःपरीक्षां कस्यापि विश्वविद्यालयस्य छात्रवृत्तेः पदकानां पारितोषिकाणां कृते वा एतत्परीक्षासंबद्धान्यविश्वविद्यालय प्रदेयपारितोषिकाणां कृते वाऽर्हाः न भवन्ति।

४. कस्यामपि परीक्षायामेकस्मिन् विषयेऽवाप्तुं मोचनमावश्यकातिरिक्तगुणाः नानुमन्यन्ते।

५. उच्चस्तरावाप्त्यायथवा विशिष्टोत्तीर्णतायैप्रदत्तावश्यकातिरिक्तगुणास्तत्परीक्षासंबद्धछात्रवृत्ति पदकपारितोषिकपुरस्काराणां कृते अगण्याः भवन्ति।

१९. न्यूनातिन्यूनकालावधौ प्रथमप्रयत्ने एव ग्रीष्मपरीक्षामुत्तीर्णा एव पारितोषिकपदकादिकृते भवन्त्यर्हाः।

२०. एतद्विश्वविद्यालयप्रदत्तमूलपत्रहानिप्रसङ्गे प्रतिकृतप्रतिसमवाप्तिमभीप्सता विद्यार्थिना तत्तत्कालानुगुणमावेदिता तिरिक्तशुल्कपूरणमावश्यकम्।

२१. यथासंभवं परीक्षासमाप्त्यनन्तरमयं विश्वविद्यालयो ह्युत्तीर्णविद्यार्थिसूचीमेकां विभागत्रये विनिर्दिश्य प्रकाशयिष्यति। न्यूनातिन्यूनतयोपनिर्दिष्टकाले निर्दिष्टप्रथमद्वितीयश्रेणीमध्ये प्राप्तस्थलानां परीक्षामुत्तीर्णानां नामनिर्देशः गुणवत्तानुसारमेतन्नियमबद्धमेवं भविष्यति –

१. गुणवत्तासूचीमध्ये नामनिर्देशनार्थमर्हतायाःकृतेऽभ्यासक्रमपरीक्षायाः सम्पूर्त्यर्थमावश्यकन्यूनातिन्यूनकालावधिरेवगण्यो भवति। निरवधानतया तदभ्यासक्रमोत्तीर्णतायाः कृते आवश्यककालावधिरेव न्यूनातिन्यूनकालावधितया भाव्यते। तदर्थं च परीक्षार्थिना सा परीक्षा तत्तद्विमोचनक्रमेणोत्तीर्णा तत्पूर्ववर्षेष्वनुत्तीर्णा च मा भूत्।

तदभ्यासक्रमान्तर्गतपरीक्षामात्रस्यानुत्तीर्णताकारणेन विद्यार्थी गुणवत्तासूचीमध्ये नामनिर्देशं नार्हति।

२. गुणवत्तासूचीमध्ये स्थानक्रमसंख्याप्रकाशननिबन्धनानि –

अ. शतातन्न्यूनपरीक्षार्थिसंख्यायुता परीक्षा चेद्गुणवत्तासूचीमध्ये पञ्चस्थानानि।

ब. एकशताधिकोत्तरपरीक्षार्थिसंख्यायुक्तपरीक्षा चेद् गुणवत्तासूचीमध्ये भविष्यन्ति दशस्थानानि।

सा च गुणवत्तासूची ग्रीष्मकालपरीक्षाया एव भविष्यति।

२२. एतत्परीक्षामथवान्यवैधविश्वविद्यालयपरीक्षामुत्तीर्णः पूर्वमेवैतत्परीक्षाप्रवेशं नार्हति यदि सः एतदध्यादेश नियमानुषङ्गी न भवति।

२३. बी.ए.प्रशासकीयसेवापदवीप्रथमद्वितीयभागपरीक्षाः उत्तीर्णाः कुलसचिव सकाशान्निर्दिष्टपत्रे गुणप्रकाशनमवाप्तुमर्हन्ति। बी.ए.प्रशासकीयसेवापदवीचरमपरीक्षामस्याभ्यासक्रमस्योत्तीर्णास्तत्तत्कालानुसारि निर्णीतशुल्कभरणेन कुलगुरुहस्ताक्षराङ्कितपत्रद्वारा स्नातकोत्सवे पदवीं प्राप्तुमर्हन्ति।

२४. एतदध्यादेशप्रभाविप्रवृत्तिदिनाङ्कत: पूर्वं कुलगुरुणैतत्परीक्षापरीक्षान्तरसंबंधे कृतप्रकाशितनिर्देशनं (१४(८) विभागानुसारं) निरस्तं भवति।

----------

## उद्दिष्टानि हेतवश्च

विश्वविद्यालये संलग्नितमहाविद्यालयेषु च पदवीपदविकाप्रमाणपत्रादिविद्याविषयकविषयाणामध्ययनार्थ प्रवेशानुषक्ताध्यादेशसंरचना महाराष्ट्रसंविधानुसारं संख्या XXXIII (1997) 46 विभागस्य अवान्तरविभाग: (१)

१. संस्कृतभाषायां साहित्ये च प्रतिबिम्बितानां मूल्यानां, ज्ञानविज्ञानयोर्वीक्षणस्य च पुनरुज्जीवनं पोषणं परिव्यापनं च। वर्तमानभविष्यतोरावश्यकतानुलक्षं प्राचीनभारतीयाविज्ञानस्याधुनिकविज्ञानचिन्तनस्य च मध्ये प्रगतिशीलसमन्वयस्थापनम्।

२. संस्कृतसाहित्यलक्ष्यवैपुल्येन विज्ञानेन च प्रपूर्णानामथ संस्कृतशिक्षणक्रमानुच्चावचानत्यन्तमधिगत वतामथ च विद्यार्थिषु विशेषत: शालेयविद्यार्थिषु संस्कृतावश्यकतां प्रबोधयितुमुत्सहिष्णूनामाचार्याणां गणस्थापनम्।

३. भूतकालं वर्तमानेन संयोजयत: भविष्यत्कालाह्वानानि च अभिमुखीभूय परिष्कर्तुं राज्यं सशक्ती कुर्वाणस्य संस्कृताध्ययनस्य समस्तक्षेत्रेषु सर्जनात्मकताया: परिशोधनस्याविष्करणस्य च प्रोत्साहनं प्रवर्धनं च।

४. परस्परसंबद्धाध्ययनपद्धतिद्वारा जीवनोपयोगिसमन्वयात्मकवीक्षणसात्मीकरणेन प्रकाशकवदभिवर्धनम्। भारतस्य पुनर्जागरणं पुनरुज्जीवनं च जनयितुमन्यविभागेषु कार्यरतेषु विशिष्टजनेषु शिक्षकवर्गे च वीक्षणस्यास्य वितरणमभिव्याप्तिश्च।

५. छात्रनागरिकेषु विशिष्टजागरणानिर्माणार्थमावश्यकाभ्यासक्रमाणां संरचना यया समाजसामान्यजागरण निर्माणशौण्डास्ते भवेयु:।

---

**एकत्रिंशत्संख्याकस्यास्यदेशस्य संशोधनानि विद्वत्परिषदा २००२ तमख्रिस्ताब्दस्य जूनमासस्य दशमदिनाङ्कस्य सभायां संसूचितानि (११ क्रमाङ्काशः दृश्यताम्), तथा २००२ तमख्रिस्ताब्दस्य जूनमासस्य एकादशदिनाङ्कस्य व्यवस्थापनपरिषद: सभायामनुमतानि (४६ क्रमाङ्काशः दृश्यताम्)। संशोधिताध्यादेशोयम् २००२ तमख्रिस्ताब्दस्य जूनमासस्य दशमदिनाङ्कत: प्रभावी भविष्यति।) अध्यादेशस्यास्य संशोधनं च विद्वत्परिषदा २००३ तमख्रिस्ताब्दस्य दिसेंबरमासस्य पञ्चमदिनाङ्कस्य सभायां जातम् (५८ क्रमाङ्काशः दृश्यताम्) तथा २००३ तमख्रिस्ताब्दस्य दिसेंबरमासस्य सप्तमदिनाङ्कस्य व्यवस्थापनपरिषद: सभायामनुमतानि (९४ क्रमाङ्काशः दृश्यताम्)।**

---------